ऽपीक्षेत शृणुयाद्वापि किञ्चन। पृष्टस्तत्रापि तद्ब्रूयात् यथादृष्टं यथाश्रुतम्”। अनिबद्धोऽकृतः। कल्पतरुमदनरत्नयोरर्थिक्रियां क्रियाभेदैरिति पठितं तत्रार्थिक्रियामर्थिव्यवहारक्रियाभेदैः प्रमाणविशेषैराप्तवाक्यादिभिस्तत्र कृत्वा तत्सम्बन्धितयावधार्य्य ऋणादिके विवादविषये यः प्रत्यक्षं प्रत्यर्थिसमक्षं लेख्यतेऽर्थिनेत्यर्थात् स तत्र लेखितः साक्षीति व्याख्येयम्। कालावधिरपि साक्ष्ये स्मर्य्यते “सुदीर्घेणापि कालेन लिखितः सिद्धिमाप्नुयात्। स्वज्ञानञ्चात्मनो लेख्यम्” कुर्य्यादिति शेषः। अजानन्तं लिप्यनभिज्ञमात्मानमन्यद्वारा साक्ष्यहमत्रेति लेखयेत्। स द्विविधोऽपि लिखितः साक्षी चिरकालेनापि सिद्धिं निर्णायकतामाप्नुयादित्यर्थः। कात्यायनः “अथ स्वहस्तेनारूढस्तिष्ठेच्चैकः स एव तु। न चेत् प्रत्यभिजानीयात् तत्स्वहस्तैः प्रसाधयेत्”। नारदः “अष्टमात् वत्सरात् सिद्धिः स्मारितस्येह साक्षिणः। आपञ्चमात् तथा सिद्धिर्यदृच्छोपगतस्य तु। आ तृतीयात् तथा वर्षात् सिद्धिर्गूढस्य साक्षिणः” इति। इदञ्च प्रायोवादेन, यतः स एवाह “अथ वा कालनियमो न दृष्टः साक्षिणः प्रति। स्मृत्यपेक्षं हि साक्षित्वमाहुः शास्त्रविदो जनाः। यस्य नोपहता बुद्धिः स्मृतिः श्रोत्रञ्च नित्यशः। सुदीर्घेणापि कालेन स वै साक्षित्वमर्हति”। ते च “साक्षिणः कीदृशाः कार्य्या व्यवहारेष्वसाक्षिणः। तादृशान् संप्रवक्ष्यामि यथा वाच्यस्तत्र तैः। गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयोनयः। अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि। आप्ताः सर्व्वेषु वर्णेषु कार्य्याः कार्य्येषु साक्षिणः। सर्व्वधर्म्मविदो लुब्धा विपरीतांस्तु वर्जयेत्”। मौलाः प्रख्यातकुलोद्भवा इति कल्पतरुः। मूलं पूर्व्वपुरुषात्तस्माद्भवन्तीति मौलाः। तदधीते तद्वेत्त्यणिति मदनरत्ने। वक्ष्यमाणयाज्ञवल्क्यवचनसंवादात् साक्षित्वेनैव पूर्व्वपुरुषान्वेदित्वाक्षेपात्तदर्थकमौलपदानर्थक्यप्रसङ्गाच्च कल्पतरुव्याख्यानमेव सम्यक्। रत्नाकरोऽपि “मौलाः कुलीना” इत्येव व्याख्यातम्। मूलं प्रतिष्ठा सा येषामस्ति ते मौलाः अर्थकथनमेतत्। तद्धितस्तु भवार्थ एव कर्त्तव्यः, यो हि यत्र भवः सोऽपि तस्यास्तीत्यविरुद्धमिति वदन् मेधातिथिरपीदृशमर्थमनुमन्यते प्रतिष्ठान्तरस्य साक्षिलक्षणानुपयोगात्। पुत्रादिप्रतिष्ठायाः पदान्तरैरेवोपादानात्। अत्र क्षत्रियादिग्रहणं नात्यन्तिकब्राह्मणव्युदासपरं, किन्तु सति सम्भवेऽनेकाध्यापनाग्निहोत्रादिकार्य्यव्यग्रस्य तस्य न साक्षित्वं, साक्ष्यन्तरासम्भवे तु तस्यापि साक्षित्वं सम्भवत्येव। अतएव “ब्रूहीति ब्राह्मणं पृच्छेदिति” तस्यापि साक्षित्वेन प्रश्नप्रकारविधिरुपपद्यत इति ध्येयम्। अर्थ्युक्ता अर्थिना ममैते साक्षिणः सन्तीति निर्दिष्टा न तु स्वयमेवागत्य वयमत्र साक्षिणः स्म इति वदन्तः। याज्ञवल्क्यः “तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः। धर्म्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः। त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रियापराः। यथाजाति यथावर्णं सर्व्वे सर्व्वेषु वा स्मृताः”। त्र्यवरास्त्रिभ्यो न्यूना न भवन्ति परतस्तु यथेच्छं भवन्तीत्यर्थः। जातयो मूर्द्धावसिक्तादयः। वर्णा ब्राह्मणादयः। तथा च मूर्द्धावसिक्तादीनां मूर्द्धावसिक्तादयो ब्राह्मणादयो ब्राह्मणादीनां साक्षित्वेनोपादेयाः। असम्भवे सर्व्वे सर्व्वजातीयाः सर्व्वेषु जातीयेषु वादिप्रतिवादिषु साक्षिणो ग्राह्या इत्यर्थः। व्यासः “धर्म्मज्ञाः पुत्रिणो मौलाः कुलीनाः सत्यवादिनः। श्रौतस्मार्त्तक्रियायुक्ता विगतद्वेषमत्सराः। श्रोत्रिया नपराधीनाः सूरयश्चाप्रवासिनः। युवानः साक्षिणः कार्य्या ऋणादिषु विजानता” इति। कात्यायनः “प्रख्यातकुलशीलाश्च लोभमोहविवर्जिताः। आप्ताः शिष्टा विशुद्धा ये तेषां वाक्यमसंशयम्। विभाव्यो वादिना यादृक् सदृशैरेव भावयेत्। नोत्कृष्टस्यावकृष्टस्तु साक्षिभिर्भावयेत् सदा” इति। आप्ताः यथार्थवादिनः। विशुद्धा विवादविषयीभूतार्थज्ञानवन्तः शास्त्रार्थज्ञानवन्तश्च “मतिबुद्धिपूजार्थेभ्यश्चेति” पा० कर्त्तरि क्तः। आदिकर्म्मणीति मदनरत्ने। तेषां वाक्यमसंशयं यथा भवति तथा वादिनो विभाव्योऽङ्गीकारयितव्योऽर्थात् प्रतिवादी। तत्र विशेषमाह यादृक् प्रतिवादी तत्सदृशैस्तज्जातीयैरेव भावयेत्। वादिनेत्युपलक्षणम्। वाद्यपि प्रतिवादिना तज्जातीयैरेव विभाव्यः तथा च नारदः “श्रेणीषु श्रेणिपुरुषाः स्वेषु वर्गेषु वर्गिणः। बहिर्वासिषु बाह्याः स्युः स्त्रियः स्त्रीषु च साक्षिणः” इति। पुनरपि “स्त्रीणां साक्ष्यं स्त्रियः कुर्य्युर्द्विजानां सदृशा द्विजाः। शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः”। श्रेणिपुरुषाणां सत्यपि वर्गित्वे पृथङ्निर्देशो गोवृषभन्यायेन। प्रयोजनं चात्राप्यभ्यर्हितत्वबोधनम्। वर्गिणश्च दर्शिताः कात्यायनेन “लिङ्गिनः श्रेणिपूगाश्च वणिग्व्रातास्तथाऽपरे। समूहस्थाश्च ये चान्ये वर्गास्तानब्रवीद् भृगुः।